য়া কুন্দেন্দুতুষারহারধবলা য়া শুভ্রবস্ত্রাবৃতা
য়া বীণাবরদণ্ডমণ্ডিতকরা য়া শ্বেতপদ্মাসনা |
য়া ব্রহ্মাচ্যুতশংকরপ্রভৃতিভির্দেবৈঃ সদা পূজিতা
সা মাং পাতু সরস্বতি ভগবতী নিঃশেষজাড্যাপহা ||১||
দোর্ভির্য়ুক্তা চতুর্ভিঃ স্ফটিকমণিনিভৈরক্ষমালান্দধানা
হস্তেনৈকেন পদ্মং সিতমপি চ শুকং পুস্তকং চাপেরণ |
ভাসা কুন্দেন্দুশঙ্খস্ফটিকমণিনিভা ভাসমানাঽসমানা
সা মে বাগ্দেবতেয়ং নিবসতু বদনে সর্বদা সুপ্রসন্না ||২||
সুরাসুরসেবিতপাদপঙ্কজা
করে বিরাজৎকমনীয়পুস্তকা |
বিরিঞ্চিপত্নী কমলাসনস্থিতা
সরস্বতী নৃত্যতু বাচি মে সদা ||৩||
সরস্বতী সরসিজকেসরপ্রভা
তপস্বিনী সিতকমলাসনপ্রিয়া |
ঘনস্তনী কমলবিলোললোচনা
মনস্বিনী ভবতু বরপ্রসাদিনী ||৪||
সরস্বতি নমস্তুভ্যং বরদে কামরূপিণি |
বিদ্যারম্ভং করিষ্যামি সিদ্ধির্ভবতু মে সদা ||৫||
সরস্বতি নমস্তুভ্যং সর্বদেবি নমো নমঃ |
শান্তরূপে শশিধরে সর্বয়োগে নমো নমঃ ||৬||
নিত্যানন্দে নিরাধারে নিষ্কলায়ৈ নমো নমঃ |
বিদ্যাধরে বিশালাক্ষি শূদ্ধজ্ঞানে নমো নমঃ ||৭||
মুক্তালঙ্কৃতসর্বাঙ্গ্যৈ মূলাধারে নমো নমঃ |
মূলমন্ত্রস্বরূপায়ৈ মূলশক্ত্যৈ নমো নমঃ ||৯||

মনো মণিমহায়োগে বাগীশ্বরি নমো নমঃ |
বাগৈ্ভ্য বরদহস্তায়ৈ বরদায়ৈ নমো নমঃ ||১০||
বেদায়ৈ বেদরূপায়ৈ বেদান্তায়ৈ নমো নমঃ |
গুণদোষবিবর্জিন্যৈ গুণদীপ্ত্যৈ নমো নমঃ ||১১||
সর্বজ্ঞানে সদানন্দে সর্বরূপে নমো নমঃ |
সম্পন্নায়ৈ কুমার্যৈ চ সর্বজ্ঞে নমো নমঃ ||১২||
য়োগানার্য় উমাদেব্যৈ য়োগানন্দে নমো নমঃ |
দিব্যজ্ঞান ত্রিনেত্রায়ৈ দিব্যমূর্ত্যৈ নমো নমঃ ||১৩||
অর্ধচন্দ্রজটাধারি চন্দ্রবিম্বে নমো নমঃ |
চন্দ্রাদিত্যজটাধারি চন্দ্রবিম্বে নমো নমঃ ||১৪||
অণুরূপে মহারূপে বিশ্বরূপে নমো নমঃ |
অণিমাদ্যষ্টসিদ্ধ্যায়ৈ আনন্দায়ৈ নমো নমঃ ||১৫||
পদ্মদা পদ্মবংশা চ পদ্মরূপে নমো নমঃ |
পরমেষ্ঠ্যৈ পরামূর্ত্যৈ নমস্তে পাপনাশিনি ||১৭||
মহাদেব্যৈ মহাকাল্যৈ মহালক্ষ্ম্যৈ নমো নমঃ |
ব্রহ্মবিষ্ণুশিবায়ৈ চ ব্রহ্মনার্যৈ নমো নমঃ ||১৮||
কমলাকরপুষ্পা চ কামরূপে নমো নমঃ |
কপালি কর্মদীপ্তায়ৈ কর্মদায়ৈ নমো নমঃ ||১৯||
সায়ং প্রাতঃ পঠেন্নিত্যং ষণ্মাসাত সিদ্ধিরুচ্যতে |
চোরব্যাঘ্রভয়ং নাস্তি পঠতাং শৃণ্বতামপি ||২০||
ইত্থং সরস্বতীস্তোত্রম অগস্ত্যমুনিবাচকম |
সর্বসিদ্ধিকরং নৃণাং সর্বপাপপ্রণাশণম ||২১||
ইতি শ্রী অগস্ত্যমুনিপ্রোক্তং সরস্বতীস্তোত্রং সম্পূর্ণম ||